श्री भद्रकाळ्यष्टकं – 2

श्री भद्रकाळ्यष्टकं – 2

श्रीमच्छंकरपाणिपल्लवकिरल्लोलंबमालोल्लस-
-न्मालालोलकलापकालकबरीभारावळीभासुरीं |
कारुण्यामृतवारिराशिलहरीपीयूषवर्षावलीं
बालांबां ललितालकामनुदिनं श्रीभद्रकाळीं भजे || 1 ||

हेलादारितदारिकासुरशिरःश्रीवीरपाणोन्मद-
-श्रेणीशोणितशोणिमाधरपुटीं वीटीरसास्वादिनीं |
पाटीरादिसुगंधिचूचुकतटीं शाटीकुटीरस्तनीं
घोटीवृंदसमानधाटियुयुधीं श्रीभद्रकाळीं भजे || 2 ||

बालार्कायुतकोटिभासुरकिरीटामुक्तमुग्धालक-
-श्रेणीनिंदितवासिकामरुसरोजाकांचलोरुश्रियं |
वीणावादनकौशलाशयशयश्यानंदसंदायिनी-
-मंबामंबुजलोचनामनुदिनं श्रीभद्रकाळीं भजे || 3 ||

मातंगश्रुतिभूषिणीं मधुधरीवाणीसुधामोषिणीं
भ्रूविक्षेपकटाक्षवीक्षणविसर्गक्षेमसंहारिणीं |
मातंगीं महिषासुरप्रमथिनीं माधुर्यधुर्याकर-
-श्रीकारोत्तरपाणिपंकजपुटीं श्रीभद्रकाळीं भजे || 4 ||

मातंगाननबाहुलेयजननीं मातंगसंगामिनीं
चेतोहारितनुच्छवीं शफरिकाचक्षुष्मतीमंबिकां |
जृंभत्प्रौढिनिशुंभशुंभमथिनीमंभोजभूपूजितां
संपत्संततिदायिनीं हृदि सदा श्रीभद्रकाळीं भजे || 5 ||

आनंदैकतरंगिणीममलहृन्नालीकहंसीमणीं
पीनोत्तुंगघनस्तनां घनलसत्पाटीरपंकोज्ज्वलां |
क्षौमावीतनितंबबिंबरशनास्यूतक्वणत् किंकिणीं
एणांकांबुजभासुरास्यनयनां श्रीभद्रकाळीं भजे || 6 ||

कालांभोदकलायकोमलतनुच्छायाशितीभूतिमत्
संख्यानांतरितस्तनांतरलसन्मालाकिलन्मौक्तिकां |
नाभीकूपसरोजनालविलसच्छातोदरीशापदीं
दूरीकुर्वयि देवि घोरदुरितं श्रीभद्रकाळीं भजे || 7 ||

आत्मीयस्तनकुंभकुंकुमरजःपंकारुणालंकृत-
-श्रीकंठौरसभूरिभूतिममरीकोटीरहीरायितां |
वीणापाणिसनंदनंदितपदामेणीविशालेक्षणां
वेणीह्रीणितकालमेघपटलीं श्रीभद्रकाळीं भजे || 8 ||

देवीपादपयोजपूजनमिति श्रीभद्रकाळ्यष्टकं
रोगौघाघघनानिलायितमिदं प्रातः प्रगेयं पठन् |
श्रेयः श्रीशिवकीर्तिसंपदमलं संप्राप्य संपन्मयीं
श्रीदेवीमनपायिनीं गतिमयन् सोऽयं सुखी वर्तते ||

इति श्रीनारायणगुरुविरचितं श्रीभद्रकाळ्यष्टकं |